राजस्थान–सरकार
# निदेशालय संस्कृत शिक्षा राजस्थान जयपुर
द्वितीय तल, ब्लाक 6, शिक्षा संकुल, जे.एल.एन मार्ग, जयपुर
☎: 0141–2704357 📠: 0141–2704358 email : dir-sans-rj@nic.in

क्रमांक : निसंशि/शै.अ./ 19866-905 दिनांक 3.7.2014

संभागीय संस्कृत शिक्षा अधिकारी,

जयपुर, जोधपुर, उदयपुर, कोटा, बीकानेर

भरतपुर, अजमेर संभाग,।

विषय :– संस्कृतसम्भाषण–मास (जुलाई–2014) के अन्तर्गत प्रमुखता से करणीय कार्यक्रम एवं संस्कृतसम्भाषण–पाठ्यक्रम प्रेषण।

सन्दर्भ :– विभागीय समसंख्यक पत्रांक 17473–513 दिनांक 18.06.2014

महोदय,

सान्दर्भिक विषयान्तर्गत संस्कृतसम्भाषण–मास (जुलाई–2014) के अन्तर्गत प्रमुखता से करणीय कार्यक्रम एवं संस्कृतसम्भाषण–पाठ्यक्रम से सम्बन्धित संलग्न सामग्री की उपलब्धता संकुल प्रभारियों के माध्यम से सभी संस्थाओं में सुनिश्चित करावें।

संलग्न :– उपर्युक्तानुसार (पृष्ठ सं. 1 + पृष्ठ सं. 01 से 20 तक)

(डॉ० मण्डन शर्मा)
निदेशक
संस्कृत शिक्षा, राजस्थान,
जयपुर

प्रतिलिपिः निम्नलिखित को सूचनार्थ एवं आवश्यक कार्यवाही हेतु प्रेषित है–

1. समस्त प्राचार्य, राजकीय आचार्य/शास्त्री संस्कृत महाविद्यालय, राजस्थान।
2. श्री शंकर सोनी, पुस्तकालयाध्यक्ष, निदेशालय संस्कृत–शिक्षा को भेजकर लेख है कि इसे विभागीय वेबसाईट पर प्रदर्शित करवाना सुनिश्चित करें।
3. रक्षित पंजिका।

(डॉ० मण्डन शर्मा)
निदेशक
संस्कृत शिक्षा, राजस्थान,

## राजस्थान-सरकार
## निदेशालय संस्कृत शिक्षा राजस्थान जयपुर
## संस्कृत-सम्भाषण-मास जुलाई 2014
## प्रमुखता से करणीय कार्यक्रम एवं संस्कृतसम्भाषणपाठ्यक्रम

माननीय शिक्षामंत्री, राजस्थान सरकार के निर्देशानुसार प्रतिवर्ष जुलाई मास को संस्कृत-सम्भाषण-मास के रूप में सभी संस्कृत विद्यालयों एवं महाविद्यालयों में आयोजित किया जाना है, जिससे संस्कृत विद्यालयों एवं महाविद्यालयों में संस्कृत वातावरण का निर्माण हो सके। संस्कृत-सम्भाषण-मास में प्रमुखता से न्यूनातिन्यून निम्नलिखित कार्यक्रम सभी विद्यालयों एवं महाविद्यालयों में अपने स्तर पर कराया जाना अपेक्षित है-

1. सभी छात्रों को संस्कृत में अपना सम्पूर्ण परिचय देने का अभ्यास कराना।
2. अध्यापक द्वारा विद्यालय गतिविधियों में संस्कृत माध्यम से निर्देश प्रदान करना।
3. प्रतिदिन प्रार्थनासभा में शिक्षकों द्वारा पाँच मिनट संस्कृत माध्यम से उद्बोधन, कथा या समाचार वाचन।
4. प्रतिदिन प्रार्थनासभा में छात्रों द्वारा संस्कृत माध्यम से कथा, विनोद-कणिका अथवा सांदर्भिक लघुभाषण।
5. दैनिक उपयोग में आने वाली वस्तुओं के संस्कृत नामों का छात्रों को स्मरण करवाना व वाक्य प्रयोग करवाना।
6. प्रत्येक छात्र द्वारा प्रतिदिन न्यूनातिन्यून एक संस्कृत वाक्य का प्रयोग सुनिश्चित करना।
7. संस्कृत संख्या स्मरण-1 से 100 तक।
8. संस्कृत माध्यम से समयज्ञान करवाना।
9. कक्षा में श्यामपट्ट-सूचनाओं का संस्कृत माध्यम से लेखन।
10. सरल संस्कृत गीतों का अभ्यास।
11. ''भगवन् मदीयदेशे'' प्रार्थना का स्मरण व अभ्यास।
12. छात्रों द्वारा संस्कृत सूक्तियों, श्लोकों, व्यवहारवाक्यों, संख्याशब्दों, शब्दरूप, धातुरूप, दैनिकोपयोगी वस्तुओं के नाम आदि भित्तिपत्र, थर्मोकोल, सीट या कार्डसीट आदि पर लिखकर कक्षाओं में लगाना।
13. छात्रों को घर पर भी प्रतिदिन कुछ संस्कृत-शब्दों के प्रयोग हेतु प्रेरित करना।
14. विद्यालय के आस-पास के क्षेत्र में संस्कृत-सूक्तियों तथा आदर्शवाक्यों का लेखन।
15. संस्कृतं वदतु व संस्कृतव्यवहारसाहस्री जैसी अन्य पुस्तकों के माध्यन से छात्रों को सम्भाषण कौशल में वृद्धि करना।
16. साप्ताहिक बालसभा एवं उत्सव/जयन्तियों का संचालन संस्कृत माध्यम से करवाना।

# प्रार्थना (सरस्वतीवन्दना)

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।। 1 ।।

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।।2।।

# प्रार्थना

भगवन्! मदीयदेशे सुखिनो जना भवन्तु,
मेधाविनश्च सर्वे गुणशालिनो भवन्तु।

विश्वेश! विश्वमूर्ते! करुणा तथा विधेया।
स्वाधीनभारतेऽस्मिन् मुदिताः सुखं वसन्तु।। भगवन्........।।

पूज्यस्वपूर्वजानां रीतिं प्रशस्तनीतिम् ।
निजसंस्कृतिं पुराणीं सुधियो न विस्मरन्तु।। भगवन्......।।

सर्वज्ञ! हे दयालो! कुरु भारते प्रसादम्!
गेहेषु गोरसानां सरितः पुनः सरन्तु ।। भगवन्........।।

भवतु प्रभोऽस्मदीया भूमिः सदान्नपूर्णा।
स्वालम्बनस्य सर्वे पाठं पुनः पठन्तु।। भगवन्.....।।

साहित्यसेवनेन विज्ञानवर्धनेन।
यशसा श्रिया लसन्तः समयं नरा नयन्तु ।। भगवन्.......।।

आढ्योऽथवा दरिद्रो देशः प्रियः पितेव।
चित्ते स्वदेशमानं नहि मानिनस्त्यजन्तु।। भगवन्......।।

विश्वम्भर त्वमेव ननु विश्वपालकोऽसि।
त्वामेव भारतीया भूतिप्रदं नमन्तु।। भगवन्.......।।

## प्रार्थना

पठामि संस्कृतं नित्यम्
वदामि संस्कृतं सदा।
ध्यायामि संस्कृतं सम्यक्
वन्दे संस्कृतमातरम् ।।

संस्कृतस्य प्रसाराय
नैजं सर्वं ददाम्यहम्।
संस्कृतस्य सदा भक्तो
वन्दे संस्कृतमातरम्।।

संस्कृतस्य कृते जीवन्
संस्कृतस्य कृते यजन्
आत्मानमाहुतं मन्ये
वन्दे संस्कृतमातरम्।।

राष्ट्रधर्मं समाजं च
पवित्रां संस्कृतिं तथा
संरक्ष्य ननु कुर्याम
राष्ट्रं विश्वगुरुं पुनः ।।

।। वन्दे संस्कृतमातरम्।।

# ध्येयगीतम्

## संस्कृतेन पाठनम्

संस्कृतेन पाठनं संस्कृताय जीवनम्।
संस्कृतेन पाठनं संस्कृताय अर्पणम्।।

एकैकपदमपि निक्षिपाम तत्पथे
प्रत्यूहकण्टकम् उत्खनाम तत्पथे
लक्ष्यमुन्नतं तदा प्राप्नुयाम तत्पथे।। संस्कृतेन।।

चिन्तितं व्रतमिदम् आचराम जीवने
स्वीकृतं व्रतमिंद न त्यजाम जीवने
परजनैरपि व्रतं कारयाम जीवने ।। संस्कृतेन।।

संस्कृतेन चिन्तनं मानसोल्लासनम्
संस्कृतेन लेखनं सर्वकार्यसाधनम्
संस्कृतेन भाषणं भरतवर्षभूषणम्।। संस्कृतेन।।

## सम्भाषणपाठ्यक्रमः

### प्रथमः भागः

- गीतम्–पठत संस्कृतम्................
- मम नाम.............। भवतः नाम किम् ? भवत्याः नाम किम् ?
  (द्वयोर्मध्ये परिचयः परस्परं 5 जनान् प्रति)
- सः कः? सा का? तत् किम्?
  एषः कः? एषा का? एतत् किम्?
- अहम्, भवान् / भवती (अभिनयेन पाठनीयम्)
- आम् / न / किम्? (अभिनयेन)
- अस्ति / नास्ति (अभिनयेन पाठनीयम्)
- अत्र, तत्र, कुत्र, सर्वत्र, अन्यत्र, एकत्र............(अभिनयेन)
- तस्य, तस्याः, कस्य, कस्याः, एतस्य, एतस्याः
- मम नासिका..............
- बालकस्य, बालिकायाः, लेखन्याः, पुस्तकस्य। एतत् कस्य?
- (दशरथस्य........ स्फोरकपत्राणाम् उपयोगः करणीयः)
- गीतम्–मनसा सततं...........
- आवश्यकम् / मास्तु / पर्याप्तम् / धन्यवादः / स्वागतम्
- गच्छति / आगच्छति / उपविशति / उत्तिष्ठति / पठति / लिखति / खादति / पिबति / वदति / क्रीडति /
- गच्छामि / आगच्छामि..........
- गच्छतु / आगच्छतु..................
- संख्या – 1,2,3,4,.......... 10, 20........, 100
- समयः– 5.00, 5.15, 5.30, 5.45
- कथा – गतानुगतिको लोकः .......(अथवा अन्या काचित् कथा सरलभाषया वक्तव्या)
- रटनाभ्यासः (पूर्वमेव लिखितानि कानिचित् वाक्यानि वाचनीयानि)
- सूचनाः
- एकात्मता–मन्त्रः

# सम्भाषणपाठ्यक्रमः

## द्वितीयः भागः

- गीतम्
- पुनः स्मारणम् (प्रथमदिवसस्य मुख्यपाठ्यबिन्दूनाम्)
- लिंगभेदज्ञापनम् (एकवचनम्–बहुवचनम्)–बालकः–बालकाः, बालिका–बालिकाः, लेखनी–लेखन्यः पुस्तकम्–पुस्तकानि।
- ते क`? ताः काः ? तानि कानि ? एते, एताः एतानि
- भवन्तः, भवत्यः, वयम् (परिवर्तनाभ्यासः कारणीयः। यथा–सः बालक–ते बालकाः)
- सन्ति
- गीतम्
- कति (हस्ते कति अङ्गुल्यः सन्ति?)
- सप्तमी–हस्ते, उत्पीठिकायाम्, लेखन्याम् पुस्तके (स्फोरकपत्राणाम् उपयोगः करणीयः)
- कदा (आरम्भे शिक्षकः उत्तरं वदेत्, अनन्तरं छात्राः तस्य उत्तरस्य प्रश्नं पृच्छेयुः)
  यथा–रामः प्रातः काले शालां गच्छति। रामः कदा शालां गच्छति?
- अद्य श्वः, परश्वः, ह्यः, परह्यः, इदानीम् (प्रपरश्वः प्रपरह्यः)
- गच्छन्ति / गच्छामः / गच्छन्तु
- शिष्टाचारः– सुप्रभातम् / नमस्कारः / शुभरात्रिः / क्षम्यताम् / चिन्ता मास्तु
- संख्याः – 1.............................50
- समय : – 6.05, 6.10, 5.55, 5.50
- स्वागतसम्भाषणम् (सहशिकेक्षण सह)
- रटनाभ्यासः
- कथा
- वाक्यद्वयम्
- सूचनाः
- एकात्मता–मन्त्रः

## सम्भाषणपाठ्यक्रमः

### तृतीयः भागः

- गीतम्
- पुनः स्मारणम्
- क्रियापदानां बहुवचनरूपाणि–गच्छन्ति / गच्छामः / गच्छन्तु (परिवर्तनाभ्यासः)
- द्वितीयाविभक्तिः कृपया.........ददातु (वस्तूनि प्रदर्श्य शिक्षकः एकैकं ददातु यथा–घटीं, ग्रन्थं, पत्रिकाम् इति पृच्छति) ( स्फोरकपत्राणाम् उपयोगः करणीयः)
- पुरतः, पृष्ठतः, वामतः, दक्षिणतः, उपरि, अधः
- इतः, ततः, गृहतः, कुतः?
- शीघ्रम्–मन्दम्। उच्चैः–शनैः
- (कथम् ? सम्यक)
- अर्थम्, किमर्थम्?
- सप्त ककाराः–किम्? कुत्र? कदा? कति? कुतः? कथम्? किमर्थम्?
- गीतम्
- अपि, अस्तु , अहं न जानामि।
- भूतकालस्य पाठनम्–
  गतवान्, पठितवान्, लिखितवान्। गतवती, पठितवती, लिखितवती

  यथा–सः गतवान्। अहं गतवान्। सा गतवती। अहं गतवती।

  (कोष्ठकपत्रके विद्यमानशब्दानां सहयोगेन वाक्यानि रचनीयानि)
- भविष्यत्– गमिष्यति, पठिष्यति.........
- सम्बोधनम्–भोः श्रीमन्, मान्ये, भगिनि, मित्र, राम, महोदय–इत्यादयः
- संख्याक्रीडा– 3,6,9...........स्थानेषु "ॐ" वक्तव्यम्
- समयः
- सम्भाषणप्रदर्शनम्
- वाक्यत्रयम्
- कथा
- एकात्मता–मन्त्रः

# सम्भाषणपाठ्यक्रमः

## चतुर्थः भागः

- गीतम्
- पुनः स्मारणम्
- च
- अतः – यतः
- एवं
- इति–यत्
- यदि...तर्हि
- यथा–तथा
- क्रियापदानां परिवर्तनाभ्यासः। यथा– गच्छति–गतवान्–गतवती<br>गच्छन्ति–गतवन्तः–गतवत्यः
- भविष्यत्कालः–गमिष्यति–गमिष्यन्ति<br>गमिष्यामि–गमिष्यामः
- तः..........पर्यन्तम्
- अद्य आरभ्य
- कृते
- विशेषपाठनम् –आसीत्–आसन्। आसम्–आस्म।करोति–कुर्वन्ति।करोमि–कुर्मः। ददाति–ददति। ददामि–दद्मः
- तुमुन्–लेखितुम्, पठितुम्........
- एकः, एका, एकम्–लिंगभेदः ज्ञापनीयः
- भोजनसम्बन्धिशब्दाः
- संख्या
- समयः
- कथा
- सम्भाषणप्रदर्शनम्
- एकात्मता–मन्त्रः

# सम्भाषणपाठ्यक्रमः

## पंचमः भागः

- गीतम्
- पुनःस्मारणम्
- तृतीयाविभक्तिपाठनम्
- सह
- विना
- अद्यतनः, ह्यस्तनः, श्वस्तनः, पूर्वतनः, इदानीन्तनः ( अद्यतनी, अद्यतनम्)
- गत
- आगामि
- स्म
- अभवत्
- क्त्वा प्रयोगः
- बन्धुवाचकशब्दाः
- वर्णाः (रक्तवर्णः,पीतवर्णः...........)
- रुचयः (स्वादाः)
- वाहनानां नामानि
- वेषभूषणादिनां नामानि
- क्रीडा
- पञ्च वाक्यानि
- कथा
- एकात्मता–मन्त्रः

# सम्भाषणपाठ्यक्रमः

## षष्ठः भागः

- गीतम्
- पुनः स्मारणम्
- पुरातनम्–नूतनम्
- बहु–किंचित्
- दीर्घः–ह्रस्वः
- उन्नतः–वामनः
- ईदृशः–तादृशः–कीदृशः?
- क्त्वा–तुमुन् (परिवर्तनाभ्यासः)
- किन्तु
- निश्चयेन
- खलु
- अपेक्षया
- इव
- प्रायशः
- शक्नोति
- इतः पूर्वम्–इतः परम्
- विशेषणविशेष्यभावस्य अभ्यासः
- बन्धुवाचकशब्दाः
- प्राणिनां नामानि
- वाक्यविस्तरणम्
- कथा
- 6–वाक्यानि
- एकात्मता–मन्त्रः

## सम्भाषणपाठ्यक्रमः

### सप्तमः भागः

- गीतम्
- पुनःस्मारणम्
- विशेषणविशेष्ययोः समानविभक्तित्वम्
- बहिः–अन्तः
- रिक्तम्–पूर्णम्
- इत्युक्ते
- अन्ते
- चेत्–नो चेत्
- क्रीडा (जन्तूनां नामाधारेण)
- वैद्यरोगिणोः सम्भाषणम्
- प्रश्नोत्तरस्पर्धा
- ऋषीणां नामानि
- कथा (शिक्षकः एकां कथां वदति। अनन्तरं छात्रेषु एकैकः तस्याः कथायाः एकैकं वाक्यम् उक्त्वा तां सम्पूर्णां करोति)
- संख्याः (दीर्घसंख्यालेखनम्)
- सप्त वाक्यानि
- कथा
- एकात्मता–मन्त्रः

# सम्भाषणपाठ्यक्रमः

## अष्टमः भागः

- गीतम्
- पुनःस्मारणम्
- अतः—यतः (परिवर्तनाभ्यासः)
- यद्यपि—तथापि
- यत्—तत्
- यः—सः
- या—सा
- यत्र—तत्र
- कति—कियत् एतयोः भेदः
- यावत्—तावत्
- एकश्वासेन संख्याकथनम्
- कथा
- चर्चा
- शरीराङ्गानां नामानि
- हास्यकणिका
- अष्ट वाक्यानि
- एकात्मता—मन्त्रः

# सम्भाषणपाठ्यक्रमः

## नवमः भागः

- गीतम्
- पुनः स्मारणम्
- चित्
- द्वयम्
- संख्यासु लिङ्गभेदः
- शिक्षकः "अहं वैद्यः। मम नाम सुरेशः" छात्राः तमुद्दिश्य प्रश्नान् पृच्छेयुः।
- अर्थम्
- तव्यत्–अनीयर्
- अनन्तकथारचना
- संख्यायोजनम्
- छात्रैः सह प्रश्नोत्तरम् (विविधविषयमवलम्ब्य)
- नव वाक्यानि
- एकात्मता–मन्त्रः

# सम्भाषणपाठ्यक्रमः

## दशमः भागः

- गीतम्
- पुनः स्मारणम्
- पत्रलेखनम्
- मार्गनिर्देशः
- सान्दर्भिकसम्भाषणम्
- शुभाशयाः
- काल्पनिककथनम्
- एकात्मता–मन्त्रः

# संस्कृतगीतानि

## 1. अवनितलं पुनरवतीर्णा स्यात्

अवनितलं पुनरवतीर्णा स्यात्
संस्कृतगङ्गाधारा

धीरभगीरथवंशोऽस्माकं

वयं तु कृतनिर्धाराः।।

निपततु पण्डितहरशिरसि

प्रवहतु नित्यमिदं वचसि

प्रविशतु वैयाकरणमुखं

पुनरपि वहतात् जनमनसि

पुत्रसहस्रं समुद्धृतं स्यात्

यान्तु च जन्मविकाराः।। धीरभगीरथ........।।

ग्रामं ग्रामं गच्छाम

संस्कृतशिक्षां यच्छाम

सर्वेषामपि तृप्तिहितार्थं

स्वक्लेशं न हि गणयेम

कृते प्रयत्ने किं न लभेत

एवं सन्ति विचाराः ।। धीरभगीरथ........।।

या माता संस्कृतिमूला

यस्या व्याप्तिः सुविशाला

वाङ्मयरूपा सा भवतु

लसतु चिरं सा वाङ्माला

सुरवाणीं जनवाणीं कर्तुं

यतामहे कृतिशूराः ।। धीरभगीरथ........।।

## 2. संस्कृतेन सम्भाषणं कुरु

संस्कृतेन सम्भाषणं कुरु जीवनस्य परिवर्तनं कुरु
यत्र यत्र गच्छसि पश्य तत्र संस्कृतं
संस्कृतेः संरक्षण कुरुऽऽ।। संस्कृतेन.....।।
जीवनस्य लक्ष्यमस्ति किम् ?
जीवनस्य लक्ष्यमेव संस्कृतस्य वर्धनम्।
स्फूर्तिरस्ति, प्रीतिरस्ति संस्कृतस्य वर्धने
जिजीविषाम संस्कृताय रक्षयाम संस्कृतिं
समर्पयाम संस्कृताय जीवनम्ऽऽ।। संस्कृतेन.....।।
जागृयाम वयं प्रेरयाम
जागृयाम प्रेरयाम सर्वराष्ट्रसोदरान्
सम्पिबाम वयं पाययाम
सम्पिबाम पाययाम संस्कृतामृतं सदा
देशहितचिन्तनं विना यस्य जीवनम्
व्यर्थमेव तस्य गर्ह्यजीवनम्ऽऽ।। संस्कृतेन.....।।
ऐक्यमस्तु अचलबुद्धिरस्तु
ऐक्यमस्तु अचलतास्तु संस्कृताभिमानिनाम् ।
धीरतास्तु नैव भीतिरस्तु
धीरतास्त्वभीतिरस्तु मास्तु उदासीनता
मातृभूमिसेवनं दीनदलितरक्षणं
संस्कृतप्रचार एव जीवनम्ऽऽ।। संस्कृतेन.....।।

## 3. भवतु भारतम्.......

शक्तिसम्भृतं युक्तिसम्भृतं

शक्ति–युक्तिसम्भृतं भवतु भारतम्।।

शस्त्रधारकं शास्त्रधारकं

शस्त्रशास्त्रधारकं भवतु भारतम्।।

रीतिसंस्कृतं नीतिसंस्कृतम्।

रीति–नीतिसंस्कृतं भवतु भारतम्।।

कर्मनैष्ठिकं धर्मनैष्ठिकं

कर्म–धर्मनैष्ठिकं भवतु भारतम्।।

भक्तिसाधकं मुक्तिसाधकं

भक्ति–मुक्तिसाधकं भवतु भारतम्।।

## 4. मनसा सततं स्मरणीयम्

मनसा सततं स्मरणीयम्
वचसा सततं वदनीयम्
लोकहितं मम करणीयम् ।। लोकहितं।।

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम् ।। मनसा।।

न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम्
कार्यक्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम् ।। मनसा ।।

दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम्
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम् ।। मनसा ।।

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम् ।। मनसा ।।

# 5. पठत संस्कृतम्

पठत संस्कृतं, वदत संस्कृतं
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ।। पठत।।

ज्ञानवैभवं वेदवाङ्‌मयं ।
लसति यत्र भवभयापहारि मुनिभिरर्जितम् ।
कीर्तिरर्जिता यस्य प्रणयनात्
व्यास–भास–कालिदास–बाणमुख्यकविभिः ।। पठत।।

स्थानमूर्जितं यस्य मन्वते,
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्।
यद्विना जना नैव जानते
भारतीय संस्कृतिं सनातनाभिधां वराम् ।। पठत।।

जयतु संस्कृतं संस्कृतिस्तथा,
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्।
जयतु संस्कृतं जयतु मनुकुलम्,
जयतु जयतु संस्कृतं जयतु जयतु मनुकुलम्।। पठत ।।

## एकात्मता–मन्त्रः

यं वैदिका मन्त्रदृशः पुराणा
इन्द्रं यमं मातरिश्वानमाहुः
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ।। 1 ।।

शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति।
बुद्धस्तथाऽर्हन्निति बौद्धजैनाः
सत्–श्री अकालेति च सिक्खसंतः ।।2।।

शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या।
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः।।3।।

## कल्याणमन्त्रः

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभाग्भवेत्।।

**ॐ शान्तिः शान्तिः शान्तिः।।**